This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ACC·NO:- ~~639~~. M1035
Title:- आदित्यव्रत पूजा
subject:- Ritual
पत्रे:- (12)

Checked 2012

(1)

क.२८

श्रीगणेशायनमः॥ अथदशादित्यव्रतंपूजां॥ तत्रादौदुर्दशापूजनं॥ एरंडकाष्टदग्ध
कृतंतेनकृष्णवर्णदशापुतलीकांलिखित्वा॥ पूजयेत्॥ एवंगुणवि०॥ असनःसुद
शाप्राप्त्यर्थंश्रीसूर्यनारायणप्रीत्यर्थंदशादित्यव्रतमहंकरिष्ये॥ तत्रदुर्दशापूजनं॥
दुर्मुखीदीनवदनामलिनीसत्यनाशीनी॥ दुर्बुद्धिदायिनीहिंसादुष्टामित्रविरोधि
नी॥ उच्चाटनकरीवामबहुचिंताप्रदायिनी॥ आदौपूज्याप्रयत्नेनगोमयेनानु
लेपयेत्॥ दुर्मुखीइहागच्छइहतिष्ठएवंसर्वत्र॥ मनोजूतिरितिऋचेप्रतिष्ठादि
पुजनांतंकृत्वा॥ ततोगोमयेनलेपयेत्॥ विसर्जनं॥ ततःपादप्रक्षालनंआच
मनं॥ अथसूर्यपूजा॥ एवंगुण वि० ममसुदशाप्राप्त्यर्थंश्रीसवितासूर्यनारायन
प्रीत्यर्थं॥ सूर्यपूजनमहंकरिष्ये॥ रक्तचंदनेनमंडलंकृत्वा तदुपरिपुजयेत्॥ ध्या
नं॥ जपाकुसुमसंकाशंजगतःपतिमव्ययं॥ सुवर्णसापूरयंतंदशासापत्नपतिं॥

K.K.S.U. LIBRARY RAMTEK 441 106 M1035 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्बाहुं प्रसंनास्यं विद्योतितजगत्त्रयं॥ कुंकुमाच्चं कुंडलिनं हारिणं वनमालिनं॥ इति ध्यानं॥ आयाहि परितुष्टोसि भक्तानां हितकाम्यया॥ सांनिध्यं 1
परिपूर्णैश्च दक्षाणां पूरणायवै॥ सूर्याय नमः प्रतिष्ठापनं॥ स्वर्णपीठांकितं दिव्यं
नानामणिगणान्वितं॥ आनितमासनं दिव्यं पीठं के छपटीकृतं॥ सू० आसनं०॥
जगद्योने जगंनाथ जगदानंदकारक॥ पाद्यं गृहाण देवेश गंधतोयासतान्वितं॥
सू० पाद्यं०॥ एहि सूर्य सहस्रांशो ते[...]सि जगत्पते॥ अनुकंपय मां भक्त्या गृहा
णार्घ्यं नमोस्तुते॥ सू० अर्घ्यं०॥ दधिक्षिरमधुसर्पीसीतयासहपंचकैः॥ स्नापितो
सि मया देव वृलसंपूर्णहेतवे॥ सू० प० पंचमंत्रे शुद्धोदक०॥ आचमनीयं०॥ वस्त्रं०
उत्तरियवस्त्र० यज्ञोपवितं आचमनं० रक्तचंदनजं श्रेष्ठं गंधाढ्यं केशरान्वितं॥ 2
विलेपनं च ते भानो प्रीसर्थं प्रतिगृह्यतां॥ गंधं०॥ तंदुलाशांखवलश्छ्वा रक्तचंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमिश्रितः॥ अक्षतास्चेमयदत्ता मिरङ्ग दिशानमोस्तुते॥ सू० अक्ष०॥ जपाकु
सुमजातीच मल्लिकादिप्रसूनकं॥ चंपकं सर्वसिध्यर्थं पुष्पं धारय मूर्धनी॥ पु
ष्पं०॥ दिव्यद्रुमसमुद्भूतं गंधाढयं सुमनोहरं॥ आनितोयं मया धूपं गृहाण सुरसत
म॥ धूपं०॥ उद्दीप्यमाननीहारिहारिणी तिग्मतेजसे॥ दीपं गगनदीपाय अर्पयेप
रमापुदा॥ सू० दीपं०॥ लेह्यं पेयं तथा चोष्यं खाद्यं मोदकखंडिका॥ अनेनक
रसंमिश्रं नैवेद्यं प्रतिगृह्यतां॥ सू० नैवे०॥ आचम०॥ करोद्वर्तनं॥ फलदानेन
देवेशसुपुत्रंच प्रयच्छसी॥ त्वदग्रे फलितं देव फलं परम संपदा॥ सू० फलं०॥ पु
गिफलस कर्पूरं तांबुलं दशसंयुतं॥ तांबुलं गृह्यतां देवदेवरिवृद्धिपरां विभो॥
सं० तांबु०॥ हिरण्यगर्भेति दक्षिणः॥ इदं० हविः नीराजनं॥ यज्ञेन यज्ञेति पु
ष्पांज०॥ अनंत अव्यय नव पापं ब्रह्महत्यादिदुस्तरं॥ पदेपदे प्रदक्षिण्ये नाराये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णजगत्पते॥प्रदक्ष०॥नमः कणकवर्णाय कणकाभरणाय च॥कलिकल्मश्र
२ नाशाय काश्यपायनमोनमः॥नमस्कारः०॥अशेषसंप्रदा दात्रे नंदे त्रिजगं
तामपि॥जगतः कामदात्रे यजगत्पूज्यायते नमः॥प्रार्थना०॥गत्पगप्द०विसर्ज
नं०॥अथदशादित्यपू०दोरकपू०॥सूर्यायनमः आवाहनं॥आवाहयामिदे
वेशामादित्यं विश्वरूपिणं॥दशादित्यव्रते ह्यस्मिन्सूत्रमूर्तिंजगद्गुरुं॥आ० आवा
हनादीशोडशोपचारैः सूत्रगं० विसर्जनं॥अथांगपूजा० आदित्यायनम०॥दक्षाये
नम०॥सूर्यायैनमः॥प्रज्वालिन्यैनम॥रवयेनमः अक्षहस्तायैनमः॥विश्वावेन
मः भोगदायैनमः॥नगर्यैनमः नंदायैनमः विवस्वतेनमः॥कांतायैनमः वरु
णायनमः व्यापकायनमः गभस्तिनेनमः इति गंधिपूजा पुष्पैः धूपदिपनैवेद्यतां २
बुलफलदक्षिणाएतैउपचारैः दशादित्यप्रीयंतां॥अथदोरकबंधनमंत्रः

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मासनपस्तकर द्विबाहुपद्मलोचनः॥ दिवाकरोलोकगुरुः सौभाग्यफल
दायकः॥ किरिरविरदोरूपबध्नामिदक्षीणेकरे॥ अयंमंत्रेदोरकबंधनं॥
देवदेवजगन्नाथस्वर्गस्थियंतकारकः॥ स्वदेहादुत्तराप्यद्य विसृज्य जिर्णदोर
कं॥ ततः जिर्णदोरकंपूजाकुर्यात् बिसर्जणं॥ गच्छगच्छ तत्रगच्छ ग्रंथिभिस
हमोदकान् कृत्वाच दशसंख्यकान्॥ फलैर्नानाविधैर्युतान्॥ ब्राह्मणाय
दद्यास्यामिवृतंसंपूर्णहेतवे॥ देवस्यत्वेतिमंत्रे एकभुक्तंकरिष्यातुतव
प्रियैदिवाकरः संकल्पेनरीतिदशादिसपूजनं॥ अथसुदशापुजनं॥ लिखेत्
भिंतिपरेवापिपुजयेत् दशामूर्तिकाः॥ तासांनामानि विज्ञायदशैलानिपृथक्पृ
थक्॥ सुबुद्धिदासुखकरिसर्वसंपतिदायिनी॥ अष्टभोगप्रदालक्ष्मीकीर्ती
दादुःखनाशिनी॥ पुत्रप्रदायिनिदेव्यादशामी धर्मदायिनि॥ विचित्रवसनादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यासर्वाभरणभूषित्ताः॥ ध्यायेत्दशा दशादेव्यावरदाह्यभयप्रदाः॥ इतिध्या
नं॥ आवाहनादिषोडशोपचारैःपूजयेत्॥ देसुबुद्धिदेइहागछइतिलिष्येसारिदश
२ नामैवसुदशापूजयेत्॥ अथकथा॥ युधिष्टिरउवाच॥ भगवन्देवदेवेशसर्वेशं
स्थितिकारकं॥ दशादिसवतंबूहि कपयामेजनार्दन॥१॥ श्रीभगवानुवाच॥ श्र
णुपार्थप्रवक्ष्यामि दशादिसव्रतंशुभं॥ अनंतपुण्यफलदंपरत्रेचपरांगतिं॥२॥
शुक्लपक्षेदशम्यानुरविवारेणसंयुता॥ तस्यांतिथौप्रकर्तव्यादशादिसव्रतंशुभं॥३॥
दशाग्रंथिमयंदेवंकर्तव्यंरक्तडोरकं॥ पूजयित्वामहाधीशंदेवदेवंजगद्गुरुं॥४॥ २
चतुरस्रंहस्तमात्रंकृत्वागोमयेमंडलं॥ अष्टपत्रंलिखेत्तत्रमंडलंरक्तचंदनैः॥५॥
अग्रस्थंपूजयेत्सूर्यंदशाग्रंथिमयंदृढं॥ धूपदीपादिवस्त्राद्यैःनैवेद्यैश्चघृतपूपकं॥६॥
यायणंदशासरव्याकानमोदकानघृतपाचितान्॥ ततोदेवंक्षमस्तुदक्षिणे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

यकरेन्मसेत्॥७॥आदौमध्येतथान्यांतेकार्यमुथ्थापनंबुधैः॥आन्यार्यपू
जयेतूभक्त्यावस्त्रालंकारभुषणं॥॥युधिष्टिरउवाच॥केनव्यादौपुराकस्यके
नप्राप्तादशाशुभा॥एतंमेब्रूहिदेवेशयदाहंतववल्लभा॥९॥श्रीभगवानुवाच॥
माकुरुष्वत्रसंदेहोममवाक्यंयुधिष्टिर॥प्राप्तकालेप्रकर्त्तव्यंव्रतमेतद्गुणेश्च
भिः॥१०॥मेरुपार्श्वेभद्रपीठेसुखासीनंजगद्गुरुं॥कश्यपंसृष्टिकालारंतापसंशु
द्धमानसं॥११॥नारदोवैष्णवश्रेष्टस्त्रैलोक्यंभ्रामितांवरः कदाचिद्दुदेशाप्राप्तं
कश्यपंशरणंगतः॥१२॥नारदउवाच॥देवदानवगंधर्वऋषिपन्नगमानवाः॥
सृजयेसर्वभूतानांवर्णधर्माधर्मविवर्जीच॥१३॥स्तुत्वाविज्ञापयामासकश्यपंध
र्मवत्सलं॥कश्यपोवाच॥दुष्टग्रहाभिभूतानांदुर्दशासमहेतरसा॥१४॥देवा
दिनांदशाव्यैवजायेतेब्रह्मनंदनः॥प्रसन्नोहंमुनिश्रेष्टलोकानांहितकाम्यया॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(8)

४ नारदौवाच ॥ दुर्दशाप्राप्तिसुतानां मुक्तिं ब्रूहि मम प्रभो ॥ कश्यप उवाच ॥ साधु पृ
ष्टमाहात्म्यागजगदानंदकारका ॥१६॥ वक्ष्ये सौरव्रतं पुण्यं दुर्दशानाशनं परं ॥ दश
करं च भूतानां मनोरथफलप्रदं ॥१७॥ भानुवारे सितपक्षे दशम्यां चैव नारद ॥
प्रातःकाले च मध्याह्ने स्नानं कुर्याद्यथाविधि ॥१८॥ ध्यायेद्भानुं स्थिरमूर्तिं च स
र्वदैन्यविनाशनं ॥ सूर्यपूजाप्रकर्तव्या यथागंधानुलेपनैः ॥१९॥ नैवेद्यं फलतां
बूलं षोडशोपचारकैः ॥ पूजयेद्दुर्दशास्तत्र लिखिता दशपुत्रिकाः ॥२०॥ दुर्मुखी
दीनवदना मलिनी सत्यनाशिनी ॥ दुर्बुद्धिदा पिनि हिंसा दुष्टमित्रविरोधिनी ॥
[redacted]दौपुजाप्रयत्नेन गोमयेनानु ५
उभारती करिवामबहु चिंताप्रदायिनी ॥२१॥
लेपयत् ॥२२॥ निसंपापहले पापे देव द्विजविरोधिनी ॥ गपवं दुर्दशो देशोनी तिरा
स्व विरोधिनी ॥२३॥ विसर्जनं मंत्रः ॥ उदकं च यउपस्पृश्य दोरकं पूजयेत्ततः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९

दशग्रंथिसमायुक्तं दशासूत्रोपशोभितं ॥२७॥ दोरकं तु प्रतिष्ठाप्य केब ध्यात्म
पूजयेत् ॥ ततो देव क्षमाप्य इत्युद क्षिणे अथ करे न्यसेत् ॥२५॥ भित्तिभागेथ पट्ट
के लिखितार्दशपुत्रिकाः ॥ सुबुद्धिदा सुखकरी सर्वसंपत्प्रदायिनी ॥२६॥
अष्टभोगप्रदा लक्ष्मी कीर्तिदा दुःखनाशिनी ॥ पुत्रप्रदा च विजया दशमीध
र्मदायिनी ॥२७॥ विचित्रवसना देव्या सर्वाभरणभूषिता ॥ ध्यायेद्दशा दशा दे
व्या वरदा द्यत्नयप्रदा ॥२८॥ प्रतिष्ठा पूजनं कुर्यात् नैवेद्यं च यथाविधिः ॥ फल
कै दशा संख्या कैर्नुजीया तैल वर्जितं ॥२९॥ एवं व्रतं प्रकर्तव्यं दशाप्राप्तिकरं
ध्रुवं ॥ नारदौवाच ॥ दशाव्रतं कृतं तेन कस्य तुष्टो हि भास्करः ॥३०॥ संतुष्टो भा
स्करो देवो दशां प्राप्ता हि मानवः ॥ त सर्वे श्रोतु मिच्छा मि त्वत्प्रसादेन सत्तम ॥३१॥
कश्यपौवाच ॥ पुरा तु नलनृपालश्च चक्रवर्ती सुधार्मिकः ॥ राज्यभ्रष्टे दशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हीनोप्युत्तेनैवच्चनारद॥२२॥तेनापिपूजितःसूर्योव्रतंकृत्वाप्रयत्नतः॥दुर्द
शानाशापित्वातुप्राप्तराज्यंश्रियासह॥२३॥ततश्चद्वापरेपूर्वेपांडवादुर्दशा
५ न्विताः॥भ्रममाणावनेघोरेप्राप्तासप्तवतिसुते॥२४॥अभिवाद्यमुनीश्रेष्ठं
सर्वज्ञंकरुणान्वितं॥युधिष्ठिरौवाच॥सज्येष्ठोदशाहीनोजातोहंकेनक
र्मणा॥२५॥प्रसुषोयंपरंब्रह्महिराज्यप्राप्तिकरंमुने॥कृपांकृत्वामुनिश्रेष्ठजग
तोवैहितायच॥२६॥उदयेनापवृत्ययोनृणांतुष्टःसूर्योदिवाकरः॥तेनाप्यत
समाख्यातंकृतंधर्मेणतद्व्रतं॥२७॥तस्यव्रतप्रभावेनप्राप्तंराज्यंश्रियासह॥
श्रुत्वैवनारदोवाक्यंपुनःपप्रच्छकश्यपं॥२८॥नारदौवाच॥केनकर्मविपाके
नदुर्दशाभिहतानराः॥जायंतेमुनिशार्दूलतत्तत्कथयस्वमे॥२९॥कश्य ५
पौवाच॥शृणुनारदतत्त्वज्ञदुर्दशाभिहतान्नरैः॥तुषत्वस्मास्थिमुशलंकदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्यि दुरनुलंघनं ॥४०॥ कुमारीरजकीवृद्धापश्युयोनिरताश्चये ॥ ब्राह्मणीगुरु
गामियकुयोनौगमनेत्रिय ॥४१॥ संध्यासुपर्वसमयेरमंतेयेरजस्वला ॥ पित्र
मातृपरित्यागात्स्वामिनंरणसंकटे ॥४२॥ त्यजेद्वाधर्मपत्नीरनांदुर्दशामासुपा
पुमान् ॥ तस्मात्सर्वप्रयत्नेनन्यायमार्गेणवर्तयेत् ॥४३॥ तस्माद्दत्तंद्रुतंकार्यं
सर्वकामार्थसाधयेत् ॥ इति श्रीब्रह्माण्डपुराणेकश्यपनारदसंवादे दशादि
त्यव्रतंसंपूर्णं ॥५॥ अथश्लोक ॥ प्रतिमालक्षमेकत्रशालिग्राममहीलैकतः ॥
शालिग्रामशिलाकोटयाबद्धोपूजाधिकामता ॥१॥ वह्निस्तुशतसाहस्यां अर्च
नंसूर्यमंडले ॥ सूर्यशतसाहस्यस्यंतर्पनंब्रह्मभोजने ॥२॥ शर्यातिंचसुकन्यां
चच्यवनंशक्रमश्विनौ ॥ भोजनांतेस्मरेन्नित्यंकोरंगुष्ठाग्रतांबुनिक्षिपेत् ॥१५॥ हां
खंचंद्रार्कदैवसंवारुणंत्र्याधिदैवतं ॥ पृष्टेप्रजापतिंपातुअग्रेगंगासरस्वति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

त्राहि मां नरकात् घोरात् संसारार्णवसेवितं ॥ शंखे तिष्ठति तत्तोयं तस्मात्
शंखं प्रपूजयेत् ॥ पांचजन्य महाध्यानं नारायनकरस्थितः ॥ महाबल महा
तेजः पूजयस्मिन् स्थिरो ध्रुवं ॥ आगमार्थं तु देवानां गमनार्थं तु राक्षसान् ॥
कुरु घंटारवं तत्र देवता ह्वानलांछनं ॥ घंटानादं प्रकुर्वीत देवानां प्रितिकारकं ॥
देवानां पूजने यत्र तत्र घंटां प्रपूजयेत् ॥ गरुडमुद्रां प्रदर्श्य ॥ तेषां वा तन्नयतो
नमस्कारा अन्ये अन्येतर तो नमस्कारा अन्ये तेहते घोरतरा अंशा ततराय
उभयेतो नमस्कारा उभयत एवेनानेन तद्यतो न नमस्कारेण शमयति ॥

६

(५२)

K K S U LIBRARY
RAMTEK
441 106
M 1035
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 16:43
,TRANSFERRED=2020/09/23 at 16:46:21
,PAGES=12
,TYPE=STD
,NAME=S0003698
,Book Name=M-1035-AADITYA VRATPUJA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection